# Chandrastotram 2

# ચન્દ્રસ્તોત્રમ્ ૨

## Document Information

Text title : Chandrastotram 2

File name : chandrastotram2.itx

Category : navagraha

Location : doc_z_misc_navagraha

Transliterated by : PSA Easwaran

Proofread by : PSA Easwaran

Latest update : January 18, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 18, 2020

*sanskritdocuments.org*

# ચન્દ્રસ્તોત્રમ્ ૨

ધ્યાનં
શ્વેતામ્બરાન્વિતવપુર્વરશુભ્રવર્ણં
શ્વેતાશ્વયુક્તરથગં સુરસેવિતાઙ્ઘ્રિમ્ ।
દોર્ભ્યાં વૃતાભયગદં વરદં સુધાંશું
શ્રીવત્સમૌક્તિકધરં પ્રણમામિ ચન્દ્રમ્ ॥ ૧॥

આગ્નેયભાગે સરથો દશાશ્વશ્ચાત્રેયજો યામુનદેશજશ્ચ ।
પ્રત્યઙ્મુખસ્થશ્ચતુરસ્રપીઠે ગદાધરાઙ્ગો વરરોહિણીશઃ ॥ ૨॥

ચન્દ્રં ચતુર્ભુજં દેવં કેયૂરમકુટોજ્જ્વલમ્ ।
વાસુદેવસ્ય નયનં શઙ્કરસ્ય ચ ભૂષણમ્ ॥ ૩॥

ચન્દ્રં ચ દ્વિભુજં જ્ઞેયં શ્વેતવસ્ત્રધરં વિભુમ્ ।
શ્વેતમાલ્યામ્બરધરં શ્વેતગન્ધાનુલેપનમ્ ॥ ૪॥

શ્વેતછત્રધરં દેવં સર્વાભરણભૂષણમ્ ।
એતત્સ્તોત્રં તુ પઠતાં સર્વસમ્પત્કરં શુભમ્ ॥ ૫॥

ફલશ્રુતિઃ -
ક્ષયાપસ્મારકુષ્ઠાદિ તાપજ્વરનિવારણમ્ ।
ઇદં નિશાકરસ્તોત્રં યઃ પઠેત્ સતતં નરઃ ।
સોપદ્રવાદ્વિમુચ્યેત નાત્ર કાર્યા વિચારણા ॥ ૬॥

ઇતિ ચન્દ્રસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded and proofread by PSA Easwaran

pdf was typeset on January 18, 2020

Please send corrections to *sanskrit@cheerful.com*